Burnell's Catalogue No. 5918 Page 107. Left column
Substance—Paper Size—$10\frac{1}{4} \times 4\frac{3}{4}$ inches. Sheets—57.
Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Satyanāthayati. Complete.
Not printed

Beginning

श्री वेदव्यासाय नमः ॥

रामचन्द्रं गुणैः पूर्णं सर्वकर्मफलप्रदम् ।
ब्राह्मणोपनिषन्मन्त्रैर्वन्द्यं वन्दे रमापतिम् ॥ १ ॥

प्रणम्य पादयुगलं गुरोः सत्यनिधेर्मुनेः ।
कर्मनिर्णयटीकायाः भावं वक्ष्यामि शक्तितः ॥ २ ॥

कर्मनिर्णयं व्याख्यातुकामः टीकाकारः मंगलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति ॥ ब्राह्मणेति ॥ गुरुप्रणामनिबन्धपूर्वकं चिकीर्षितं प्रतिजानीते ॥ प्रणम्येति ॥

End:

ननु 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति वचनात् अनुभूये[ते]ति भाव्यम् ॥ अनुभू[त]त्वेति कथमित्यत आह । 'क्त्वापि छन्दसि'इति वचनादिति । अनञ्समासे छन्दसि क्त्वा इत्यस्य क्त्वा इत्यादेशो भवतीति सूत्रार्थः इयञ्च व्यवस्थेति । केचनेमं श्लोकमाविशन्ति । केचन हीननरं वाविशन्तीति वाशब्दो नोक्तव्यवस्थेत्यर्थः । प्रचयगमनार्थमिति । वस्तुतः प्रचयगमनप्रयोजकं प्रणामं स्वभावादाचरतीत्यर्थः । सर्वकर्मणां कर्तेति । सर्वकर्मणां प्रयोजककर्तेत्यर्थः ।

य इज्यते मखैः सर्वैः फलदः सर्वकर्मणाम् ।
यस्स्तुत्यो द्विविधैः शास्त्रैस्तस्मै भगवते नमः ॥

Colophon:

इति श्रीमत्सत्यनिधितीर्थश्रीचरणचरणाराधकश्रीसत्यनाथयतिविर-

चितः कर्मनिर्णयटीकाव्याख्यानरूपः कर्मप्रकाशः समाप्तः ॥

श्रीरस्तु ॥ हरिः ॐ ॥

अस्मद्गुर्वन्तर्गतरामवेदव्यासार्पणमस्तु ॥ हरिः ॐ ॥

Subject: Karmanirṇayaṭīkāvyākhyā — Karmaprakāśa. A gloss on Jayatīrtha's commentary on Ānandatīrtha's Karmanirṇaya.

Remarks:—The Ms. is in good condition. For remarks see under No. 7842.

॥ विष्णुतत्त्वनिर्णयः ॥

8046. VIṢṆUTATTVANIRṆAYAḤ.

Barnell's Catalogue No. 6229. Page 105. Right column. Substance—Paper. Size—7⅛ × 2 inches. Sheets—61. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Ānandatīrtha. Complete. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥ १ ॥

विशेषणानि यानीह कथितानि सदुक्तिभिः ।
साधयिष्यामि तान्येव क्रमात्सज्जनसंविदे ॥ २ ॥

End:

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
पट् तद्दर्शनमित्थमेव निहितं देवस्य भर्गो महत् ।

वायोरामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

स्वतन्त्रायाखिलेशाय निर्दोषगुणरूपिणे ।
प्रेयसे मे सुपर्णाय नमो नारायणाय ते ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमद्विष्णुतत्त्वनिर्णये तृ-
तीयः परिच्छेदः समाप्तः ॥

श्रीकृष्णाय नमः । श्रीरामचन्द्राय नमः ॥

श्रीमत्कालयुक्तसंवत्सरकार्तिकशुद्धपञ्चम्यां समाप्तम् ॥

Subject: Viṣṇutattvanirṇaya. 1—3 Paricchedas.

Remarks:—The Ms. is in good condition

This is the last of the ten tracts dealing with the Supreme Lord and Ānandatīrtha establishes Viṣṇu to be such.

VIṢṆUTATTVANIRṆAYAḤ.

Descriptive No.	Collection No.		Substance.	Size inches	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script	Complete or otherwise.
8047	B. L.	5897 i	Paper.	$11\frac{3}{8} \times 4\frac{3}{8}$	58	11	Devanāgarī	Complete
8048	,,	5922	,,	$8 \times 3\frac{7}{8}$	12	15 or 16	,,	,,
8049	,,	5949	,,	$5\frac{1}{2} \times 2\frac{7}{8}$	75	6	,,	,,
8050	,,	5950	,,	$8\frac{7}{8} \times 3$	27	7	,,	,,
8051	,,	5951	,,	$8\frac{7}{8} \times 3\frac{1}{2}$	28	5	,,	,,
8052	,,	5952	,,	$8\frac{7}{8} \times 3\frac{1}{2}$	28	8	,,	,,
8053	,,	5953	,,	$9\frac{1}{2} \times 3\frac{1}{2}$	22	10	,,	,,
8054	,,	6280 d	,,	$8\frac{1}{2} \times 3\frac{1}{4}$	7 (8–14)	20–22	,,	,,

DETAILED REMARKS

on the

VIṢṆUTATTVANIRṆAYA MSS.

IN THE ABOVE TABLE.

8048 Colophon—

इति श्रीमदानन्दतीर्थ + विष्णुतत्त्वविनिर्णये द्वितीयः परिच्छेदः

समाप्तः ॥

विष्णुप्रियम....जिष्णुसारथितोपदम् ।

कृष्णभक्तोलिखच्छेषो विष्णुतत्त्वविनिर्णयम् ।

8051 On the first and last page is given—

'वरखेडिशेषाचेदं पुस्तकम् ॥'

॥ विष्णुतत्त्वनिर्णयटीका ॥

8055. VIṢṆUTATTVANIRṆAYATĪKĀ.

Burnell's Catalogue No. 5955 Page 106 Right column. Substance—Paper. Size—9¼ × 4⅞ inches. Sheets—197. Lines—109 to a Page. Script—Devanāgarī. No. of Granthas—5116 Author—Jayatīrtha. Complete Not printed.

Beginning :

श्री वेदव्यासाय नमः ॥

विश्वस्योदयमातनोति तदनु त्राणं विधत्ते पुनः

सौख्यासौख्यतरहानिसाधनमलं वक्ति श्रुतीर्व्यञ्जयन् ।

स्वापं प्रापयति श्रमापहृतये कल्पावसाने च य-
स्तं देवं पितरं पतिं गुरुतमं वन्दे रमावल्लभम् ॥ १ ॥

लसतु श्रीमदानन्दतीर्थेन्दुर्नो हृदन्तरे ।
यद्वचश्चन्द्रिकास्वान्तसन्तापं विनिकृन्तति ॥ २ ॥

पदवाक्यप्रमाणज्ञान् प्रणम्य शिरसा गुरून् ।
व्याकरिष्ये यथाबोधं विष्णुतत्त्वविनिर्णयम् ॥ ३ ॥

विघ्नविघातादिसाधनतया अविगीतशिष्टाचारपरंपरायवगतं नारायणवन्दनं स्वयमन्तरायविधुरोऽपि भगवानानन्दतीर्थमुनिः शिष्यान् ग्राहयितुं प्रकरणादौ निबध्नाति ॥ सदागमैकमिति ॥ सदा वन्द इत्यनेन नमननारायणवन्दनं प्रत्यूहविरहादिप्रयोजनोद्देशेनेति सूचयति ।

End :

अमृतस्येति ॥ अमृतस्य मुक्तामुक्तसमुदायस्यैष परमात्मा सेतुराश्रयः । परस्परमपि मुक्तानां साम्यं नास्ति किमुत परमात्मनेति । भावेन तत्र पुराणवाक्यं पठति । नपाख्या इति । इति हि श्रुतिरिति पुराणकृत्स्वोक्तार्थे 'युवा स्यात्स यो मनुष्याणां राद्ध' इत्यादि श्रुतिसंमतित्वेन दर्शयति । अथवा सज्जनसंविद इत्युक्तम् । तत्र कोऽसौ मोक्षः । कुतश्च तस्योपलक्षणा भगवत्संवित्साध्यत्वमिति शंकाविशेषणत्रयसाधनावसाने विष्णुं सर्वैर्गुणैरित्यादिना परिहरतीति ॥ इदानीं तृतीयपरिच्छेदार्थमुपसंहर-

ति । अत इति । एवं समापितप्रकरणो भगवानाचार्यो भक्तानां स्वस्वरूपं ख्यापयन् स्वकृतं ग्रन्थं केशवे समर्पयन्नाह ।। यस्येति ।। ग्रन्थान्तरादस्य श्लोकस्यार्थोऽवगन्तव्यः। अन्तेऽपि मंगलाचरणस्य कर्तव्यत्वान्नारायणस्य श्रुतिं श्रुतिप्रणामौ करोति । स्वतन्त्रायेति ।।

श्रीलक्ष्मीनृसिंहाय नमः ।

आनन्दसिन्धवे पूर्णप्रज्ञाचार्याब्धिबन्धवे ।
नमः श्रीहरये स्वान्तध्वान्तौघतिमिरारये ।।

मया रचितया विष्णुतत्त्वनिर्णयटीकया ।
यत्पुण्यं भावि तत्सर्वमवाप्नोतु गुरुर्मम ।।

आनन्दतीर्थभगवद्वचसां विशिष्ट-
व्याख्यानकर्मणि सुरा अधिकारिणोऽत्र ।
यन्मादृशोऽपि यतते तदतीव हास्यं
किं नाम भक्तिविवशस्य विभूषणं तत् ।।

Colophon

इति श्रीमदानन्दभगवत्पादाचार्यविरचितस्य श्रीविष्णुतत्त्वनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां तृतीयः परिच्छेदः । श्रीनृसिंहाय नमः ।। समाप्ता चेयं श्रीविष्णुतत्त्वनिर्णयस्य टीका [समाप्ता] ।। श्रीकृष्णार्पणमस्तु । श्रीवासुदेवार्पणमस्तु ।।

Subject: Viṣṇutattvanirṇayaṭīkā

Remarks :—The Ms. is in good condition.

VIṢṆUTATTVANIRṆAYAṬĪKĀ.

Descriptive No		Collection No.	Substance.	Size inches.	No of Sheets or leaves.	No of Lines per Page or sheet.	Script	Complete or otherwise.
8056	B. L.	5954	Paper	9½×3½	197	10	Devanāgarī	Complete
8057	,,	5957	,,	8¼×4	204	10 or 11	,,	,,
8058	,,	9338	Palm leaf	16½×1½	135	9	Nandināgarī	,,
8059	,,	5956	Paper.	9¼×3¼	148	9	Devanāgarī	Incomplete.
8060	,,	5958	,,	13×5	74	10	,,	,,
8061	,,	5959	,,	10⅜×4⅜	20	12-14	,,	,,
8062	,,	5960	,,	9¼×3½	29 (149-177)	9-12	,,	,,
8063	,,	5961	,,	9¼×3¼	7	9	,,	,,

॥ विष्णुतत्त्वनिर्णयव्याख्या—दीपिका ॥

8064. VIṢṆUTATTVANIRṆAYAVYĀKHYĀ—DĪPIKĀ.

Burnell's Catalogue No. 5966. Page 106. Right column. Substance—Paper Size—$9\frac{1}{2} \times 4\frac{1}{8}$ inches. Sheets—71. Lines—12 to 14 to a Page. Script—Devanāgarī. No. of Granthas—1700. Author—Timmaṇācārya (Varakhedi). Complete. Not printed

Beginning:

श्री गुरुराजाय नमः ॥ श्री वेङ्कटेशः प्रसन्नः ।

॥ हरिः ॐ ॥

नत्वा लक्ष्मीश्वरं विष्णुं सत्यं जैत्रं जगद्गुरुम् ।
विष्णुतत्त्वं प्रकाश्येऽहमार्योक्तं तु यथामति ॥

यद्यप्यार्यप्रभृतिभिः विष्णुतत्त्वं विष्णोः सर्वोत्तमत्वादिकं परमादरेण समर्थितमेव । 'अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वान्या देवाः' इत्यादिना स्पष्टं सिद्धमेव । एवञ्च नात्र विचार्यमस्ति । तथापि केचिद्बालव्यामोहकैः शब्दाडम्बरैरापाततोऽन्यथा समर्थितमिवाभाति । कुतूहलात्तदाभासीकर्तुमयं प्रयत्न इत्यदोषः । 'यतो वा इमानि भूतानि जायन्ते' 'जन्माद्यस्य यतः' इत्यादिश्रुतिसूत्राभ्यां जगज्जन्मादिकारणत्वं परब्रह्मणो विष्णोः स्वरूपभूतं लक्षणमित्यार्योक्ते स्थिते सति ते खल्वेवमाहुः ।

जगत्कारणत्वं सत्यं ब्रह्मणः स्थितम् ।

End:

न चासिद्धिः प्रलये कस्याप्यन्यस्याभावात् । य...संमतः । ब्रह्मरुद्रौ विष्णुपुत्रौ तत्पत्नीलक्ष्मीपुत्रत्वात् । संमतवत् । न चासिद्धिः । 'यं कामयते' इति श्रुतेः । सर्वे वैष्णवाः स्वस्वयोग्यपुरुषार्थभागिनः सत्यभूतस्वाम्युक्तार्थोपासकत्वात्संमतवत् । विष्णुर्वा स्वभक्तानुग्राहकः । स्वस्वामित्वेन सदोपास्यत्वात् । संमतवत् । विष्णोर्गरिमा पारमार्थिकः । अत्यन्ताबाध्यत्वात् । जगत्पारमार्थिकम् । अत्यन्ताबाध्यत्वात् । न चासिद्धिः । भवदभिमतबाधकस्य शशविषाणतुल्यत्वस्य संक्षेपेण ज्ञापितत्वात् । इत्यवे.. नन्तानां पूर्वोक्तश्रुतिस्मृतिमूलानामतिप्रबलानामनुमानानां सत्त्वान्न क्वापि दोषशङ्केति दिक् । तस्माद्बाधकगन्धाभावात् सकलश्रुतिस्मृतिभिर्युक्त्या च विष्णोरेव सर्वोत्तमत्वमिति सिद्धम् ॥

Colophon:

इति श्रीमत्पदवाक्यप्र....माणविदामग्रेसराणां श्रीमत्सत्यविजयतीर्थ श्रीमच्चरणानां निजशिष्येण वरखेडितिम्मणेन विरचितायां विष्णुतत्त्वदीपिकायां युक्तिपरिच्छेदः समाप्तः ॥

समाप्तोऽयं ग्रन्थः ॥

श्री रामचन्द्रार्पणमस्तु ॥ श्रीः ॥

Subject: Viṣṇutattvanirṇayadīpikā A commentary on Ānandatīrtha's Viṣṇutattvanirṇaya. 1-3 Paricchedas.

1. Śrutipariccheda.
2. Smṛtipariccheda.
3. Yuktipariccheda.

Remarks:—The Ms. is in a decaying condition.

For remarks about this author see notes under No. 7752.

॥ विष्णुतत्त्वनिर्णयटीकाव्याख्या—भावदीपः ॥

8065. VIṢṆUTATTVANIRṆAYAṬĪKĀ-VYĀKHYĀ—BHĀVADĪPAḤ.

Burnell's Catalogue No. 5962 Page 106. Right column. Substance—Paper Size—$11\frac{7}{8} \times 4\frac{1}{4}$ inches. Sheets—109 (2, 3, 63, 64 and 111 are missing out of 114). Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—3700. Author—Rāghavendrayati. Complete. Not Printed

Beginning:

ॐ श्री लक्ष्मीनृसिंहाय नमः ॥ श्रीः ॥

श्री सदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥ हरिः ॐ ॥

देवं नारायणं नत्वा पूर्णबोधादिकान् गुरून् ।
विवृणोमि यथाबोधं तत्त्वनिर्णयपञ्चिकाम् ॥

ग्रन्थादौ मंगलमाचरति॥ विश्वस्येति ॥ तं विश्वोत्पादकहेतुं रमावल्लभं वन्दे इत्युक्त्वा ग्रन्थादौ वन्दनीयायास्सकलवाङ्मनसनियामिकाया देव्या अपि भगवदुप-

सर्जनतया वन्दनं कृतं भवति। कुतो वन्द्यतास्येत्यतः पित-
रंपतिं गुरुतमं देवमित्युक्तम् । कथं पितृत्वादिकमस्येत्यतो
विश्वस्येत्यादि । विश्वस्येति सर्वत्रान्वेति ।

पूर्वनिपाते सति तदेकागमविज्ञेया.... भाव्यमित्यत आह ।
॥ दोषैकेति ॥

End :

रामविषयवचांसि मूलरामायणरूपाणि शिष्येषु नीतवद्वा
रामवचसि नयो न्याय आज्ञारूपः तत्युक्तं...वपुर्भीमनामकं
कुरुपृतनाक्षयकरं तृतीयं तु वपुः आनन्दरूपस्य हरेः प्रति-
पादकशास्त्रनिर्मातृमध्वाभिधमिति । चरमपादेनैव न त्रि-
पाद्याः कृत्यमित्यत आह ॥ स्तुतीति ॥ सापि तत्प्रीत्यर्थे-
ति भावः। स्वयमपि ग्रन्थान्ते मंगलमाचरति। आनन्देति ॥
विशिष्टव्याख्यानेति प्रतीतिकार्यान्तरनिरासेन तात्पर्यार्थ-
व्याख्यानकर्मणि दक्षिणामूर्तिप्रभृतयः शुभाधिकारिण इ-
त्यर्थः । तर्हि किमिति । ....व्याख्यातमित्युक्तं भक्तिवि-
वशस्येति । विभूषणं तादिति ।

अमन्दानन्दसन्दोहदेहायेन्दीवरत्विषे ।
नमः श्रीप्राणनाथाय (भक्ताभी)ष्टप्रदायिने ॥

Colophon :

इति श्रीमद्विष्णुतत्त्वनिर्णयटीकाभावदीपे राघवेन्द्रयतिकृते तृतीयः
परिच्छेदः ॥

Subject: Viṣṇutattvanirṇayaṭīkāvyākhya—Bhāvadīpa.

Remarks:—The Ms. is in a good condion. This is another commentary by the great Raghavendra diciple of Sudhīndra on Jaya Tīrtha's commentary cn Ānanda Tīrtha's Viṣṇutattva-Nirṇaya. For further remarks see under No 7855.

॥ विष्णुतत्त्वनिर्णयटीकाव्याख्या—भावदीपः ॥

8066. VIṢṆUTATTVANIRṆAYAṬĪKĀ-

VYĀKHYĀ—BHĀVADĪPAḤ.

Burnell's Catalogue No. 5963. Page 106. Right column. Substance—Paper Size—12⅞×5 inches. Sheets—127 (140-266) Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—3700. Author—Rāghavendrayati. Complete. Not Printed.

Beginning, end, colophon and subject—Same as No. 8065.

Remarks:—The Ms. is in very decaying condition.

॥ विष्णुतत्त्वनिर्णयटीका ॥

8067. VIṢṆUTATTVANIRṆAYAṬĪKĀ.

Burnell's Catalogue No. 5964. Page 106. Right column. Substance—Paper. Size—10×4 inches. Sheets—184. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—2500 Author—Pāṇḍuranga. Incomplete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥

श्री गुरुभ्यो नमः ॥ शुभमस्तु ॥

नत्वा श्रीशं गुरून् सर्वान् गुरुराजोक्तमार्गतः ।
तत्त्वनिर्णयटीकाया भावं वक्ष्ये यथामति ॥

निर्विघ्नसमाप्त्यादिसाधनतया अविगीतशिष्टाचारपरंपराद्वा...वगतविशिष्टेष्टदेवतानतिस्तुतिरूपं मंगलं गुणप्रधानभावेन शिष्यशिक्षायै ग्रन्थादौ निबध्नाति ॥ विश्वस्येति ॥ अत्र तं रमावल्लभं वन्दे इत्यन्वयः ॥

End:

भेदस्य धर्मिप्रतियोगिस्वरूपत्वे यद्यदत्यन्ताभिन्नं चात्यन्तभिन्न + विशेषणविशेष्यतया तत्प्रतीतिनियमात् तदुपजीवनेन.... ॥

Subject: Viṣṇutattva Nirṇayaṭīkā, a commentary on Ānanda Tīrtha's Viṣṇutattva Nirṇaya.

Remarks:—The Ms. is in good condition. This is a third commentary on Ānandatīrtha's Viṣṇutattvanirṇaya.

॥ विष्णुतत्त्वनिर्णयटीकाव्याख्या—
वादार्थदीपिका ॥

8068. VIṢṆUTATTVANIRṆAYAṬĪKĀ-
VYĀKHYĀ—VĀDĀRTHADĪPIKĀ.

Burnell's Catalogue No. 5965. Page 106. Right column.

Substance—Paper. Size—10 × 4⅝ inches. Sheets—306 (85-174 out of 386 are missing). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—6700. Author—Śrīnivāsa. Incomplete. Not Printed

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥

निर्विघ्नमस्तु ॥

श्रीरामं हनुमत्सेव्यं श्रीव्यासं मध्वसेवितम् ।
श्रीकृष्णं भीमसेनेष्टं लक्ष्मीपतिमहं भजे ॥ १ ॥

श्रीमदानन्दतीर्थार्यचरणावाश्रयेऽनिशम् ।
रुद्रादिसर्वविबुधैः संसेव्याविष्टदौ सताम् ॥ २ ॥

श्रुतिक्षीराब्धिमामथ्य धीमन्दरमहीभृता ।
प्रामान्वयसुधा येन तं जयेन्द्रमहं भजे ॥ ३ ॥

रघूत्तममुनीन्वन्दे तच्छिष्यानमलात्मकान् ।
छन्दोभाष्यस्य सट्टीकाकर्तॄन् वेदेशयोगिनः ॥ ४ ॥

वेदेशमुनिसत्पादसेवासंप्राप्तवैभवान् ।
यादवार्यान्वरसुधाटीकाकर्तॄन् वयं नुमः ॥ ५ ॥

यैराहं शुकवत्सम्यक् शिक्षितोऽस्मि कृपालुभिः ।
तान् वन्दे यादवाचार्यान् सदा विद्यागुरून्मम ॥ ६ ॥

अथैतत्कृपया श्रीनिवासेन विदुषा हरेः ।
तत्त्वनिर्णयटीकायाः व्याख्यानं क्रियते मया ॥ ७ ॥

सर्वज्ञाष्टीकाकारा जयतीर्थश्रीमच्चरणाः स्वचिकीर्षितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थं स्वेष्टदेवतानमनरूपमंगलं कृत्वा शिष्यशिक्षार्थं ग्रन्थादावुपनिबध्नाति ॥ विश्वस्येति ॥

End :

मयेति ॥ इदानीं स्वगर्वं परिहरति ॥ आनन्दतीर्थेति ॥ व्याख्यानकर्मणि । व्याख्यानकरणे विशिष्टव्याख्यानकर्मणीत्युक्तत्वात् सर्वाधिकारिण इत्युक्तम् । यतत इति । यत् तदिति संबन्धः । दास्यं हासास्पदं मान्य एवास्मीत्यशेषमतिमंगलम् ॥

यस्त्वत्त्वदेवान्यं(?) प्रेर्य कारयामास सत्कृतिम् ।
गुर्वन्तस्थानन्दतीर्थहृद्गं व्यासमहं भजे ॥

श्रीयादवाचार्यसत्पादसेवकेन यथामति ।
तत्त्वनिर्णयटीकाया विवृतिस्तदनुग्रहात् ॥

श्रीनिवासेन रचिता मया वादार्थदीपिका ।
व्यासपादार्पिता भूयात्सतां व्याख्योपकारिणी ॥

जयराजवचांसि क क चाहं मन्दबुद्धिमान् ।
तथाप्यसद्गुरुवरानुग्रहः किं न साधयेत् ॥

Colophon:

इति श्रीयदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां विष्णुतत्त्वनिर्णयटीकाविवृतौ वादार्थदीपिकायां तृतीयपरिच्छेदः समाप्तः ।

श्री व्यासार्पणमस्तु ॥

Subject: Viṣṇutattvanirṇayaṭīkāvyākhyā Vādārthadīpikā, a commentary on Viṣṇutattvanirṇayaṭīkā of Jayatīrtha.

Remarks:—The Ms is in good condition. This author is the disciple of Yādavendra He is the author of a commentary on Nyāyāmṛta of Vyāsatīrtha which is printed at Bombay. But this gloss on Jayatīrtha's commentary on Ānandatīrtha's Viṣṇutattva-Nirṇaya is not printed. For further remarks see under No. 7899.

॥ प्रपञ्चमिथ्यात्वानुमानखण्डनम् ॥

8069. PRAPAÑCAMITHYĀTVĀNUMĀNA-KHAṆḌANAM.

Burnell's Catalogue No. 5803 f. Page 105. Right column. **Substance**—Paper Size—$5\frac{1}{2} \times 2\frac{3}{4}$ inches Sheets—3 (17-19 out of 35). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—15. Author—Ānandatīrtha. Complete. Printed

Beginning:

विमतं मिथ्या । दृश्यत्वात् । यदित्थं तत्तथा । यथा संप्रतिपन्नम् । इत्युक्ते जगतो भावादाश्रयासिद्धपक्षः ।

End:

लिङ्गं हेतुः । निदर्शनं दृष्टान्तः ।
यो दृश्यते सदानन्दनित्यव्यक्तचिदात्मना ।
निर्दोषाखिलकल्याणगुणं वन्दे रमापतिम् ॥

Colophon:

मिथ्यात्वानुमानखण्डनं समाप्तम् ॥

Subject: Mithyātvānumānakhaṇḍana, a tract criticising Vedāntic theory and establishing that the world is real.

Remarks:—The Ms. is in good condition.

The other works contained herein are :

प्रमाणलक्षणम्	मायावादखण्डनम्
तत्त्वविवेकः	उपाधिखण्डनम्
तत्त्वसंख्यानम्	तत्त्वोद्योतः

This tract is published along with a commentary by Jayatīrtha called Pañcikā or Ṭīkā at Bombay in 1896.

PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
8070	B. L. 5894 c	Paper.	8×4	1 (5th)	12	Devanāgarī.	Complete.
8071	,, 5895 f	,,	$6\frac{3}{8} \times 3\frac{7}{8}$	2 (9 & 10)	12	,	,,
8072	,, 5896 f	,,	$9\frac{7}{8} \times 3\frac{1}{2}$	1 (7th)	10	,,	,,
8073	,, 5897 g	,,	$11\frac{1}{4} \times 4\frac{7}{8}$	1 (6th)	11	,,	,,
8074	,, 6206	,,	$7\frac{1}{8} \times 2$	2	6	,,	,,
8075	,, 6230	,,	$8\frac{1}{2} \times 1\frac{1}{2}$	1 (3rd)	20-22	,,	,,
8076	,, 9848 d	Palm leaf.	$6 \times 1\frac{1}{4}$	2 (12 & 13)	6	,,	,,

॥ प्रपञ्चमिथ्यात्वानुमानखण्डनविवरणम् ॥

8077. PRAPAÑCAMITHYĀTVĀNUMĀNA-KHAṆḌANAVIVARAṆAM.

Burnell's Catalogue No. 5912. Page 105. Right column.
Substance—Paper. Size—9½ × 3½ inches. Sheets—15.
Lines—9 or 10 to a Page. Script—Devanāgarī. No. of
Granthas—275. Author—Jayatīrtha. Complete. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥ श्रीगुरुभ्यो नमः ॥

नत्वा विश्वोदयस्थेमलयहेतुं पतिं श्रियः ।
कुर्मः प्रपञ्चमिथ्यात्वमानखण्डनपञ्चिकाम् ॥

जन्माद्यस्य यत इति भगवता सूत्रकारेण जगदुदयादिनिमित्तकारणत्वं परब्रह्मणो लक्षणमभिहितम् । न च जगत्सत्यतामन्तरेण तद्वास्तवं संभवति । सापि न परोदीरितप्रपञ्चमिथ्यात्वप्रमाणस्याभासता...त्पादनेन विनोपपद्यते । इति तदर्थमिदं प्रकरणमारभ्यते भगवानाचार्यः । ननु कथं स्वपक्षसाधनेन विना निर्णयः । सत्यम् । तथापि शास्त्रैकदेशसंबन्धित्वात्प्रकरणस्य न दोषः ॥

End:

तेन यदुक्तमात्मनोऽदृश्यत्वादिनानुपपादितं भवतीति दृश्यते चेत् रूपादिमत्त्वेन नित्यत्वं प्रसज्यतेति चेन्न । निर्दोषानन्दनित्याभिव्यक्तज्ञानात्मकत्वेनाजडत्वात् । तदाह

सदानन्देति । इत्थंभूतलक्षणे तृतीया । न केवलं निर्दोषा-
नन्दचिदात्मकः नाप्यभेदाद्गुणगुणिभाव इत्युक्तम् । नि-
र्दोषेति ॥ कल्याणत्वं परिपूर्णत्वादिना । रमापतिमित्यनेन
भगवती वन्दिता भवति ।

उत्पत्तिस्थितिभंगं विश्वं यस्मात्प्रपद्यते पुरुषात् ।
स जयति जगतामन्तर्यामी स्वामी रमानाथः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितमिथ्यात्वानुमानख-
ण्डनविवरणं जयतीर्थभिक्षुविरचितं समाप्तम् ॥

श्रीवासुदेवार्पणमस्तु ॥ ग्रन्थसंख्या २७५

Subject: Prapañcamithyātvānumānakhaṇḍanavivaraṇa.

Remarks:—The Ms is in good condition. This is published along with the text at Bombay, in 1896.

PRAPAÑCAMITHYĀTVĀNU MĀNAKHAṆḌANA—VIVARAṆAM.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
8078	B. L. 5917 c	Paper.	9½ × 6	14 (19-82)	14	Devanāgarī.	Complete.
8079	„ 5923 c	„	8 × 4¼	21 (58-78)	9	„	„
8080	„ 14764	„	9½ × 4½	14	6-9	„	„
8081	„ 5913	„	8½ × 3¼	13	6-9	„	Incomplete.
8082	„ 9843	Palm leaf.	14 × 1½	6	9-10	Telugu & Nandināgarī	„

॥ सारभोगप्रकारः ॥

8083. SĀRABHOGAPRAKĀRAḤ.

Burnell's Catalogue No. 6228 Page 110 Right column. Substance—Paper Size—7⅛ × 2 inches. Sheets—3 (8-11 out of 11) Lines—5 to a Page. Script—Devanāgarī No. of Granthas—20. Author—Ānandatīrtha? Complete. Not printed

Beginning:

श्री गुरुभ्यो नमः ॥ सारभोगप्रकारः ॥

पुरतो मण्डलैः स्थाप्य नैवेद्यञ्च चतुर्विधम् ।
घृतमासिच्य मूलेन प्रोक्ष्यैव तुलसीं क्षिपेत् ॥

गिरिमुद्रां सिनीमुद्रां धेनुमुद्रां प्रदर्श्य च ।
संस्मरेत्सुरभेरूधो गालतामृतसेचनम्(?) ॥

मूलमष्टाक्षरं जप्त्वा मन्त्रेण परिषेचयेत् ।
अमृतोपस्तरणं च प्राणायेत्यादि संस्मरेत् ॥

हस्तोदकं ततो दत्वा जुषध्वं समुदाहरेत् ।
अद्य तिष्ठति यत्किञ्चिदिति मन्त्रेण भक्तितः ।
तथैव मानसान् भक्ष्यभोज्यादीन् बहुशोऽर्पयेत् ॥

End:

यद्यन्मदिन्द्रियैरन्नं बाह्यैर्भोज्यमितः परम् ।
सर्वावस्थासु तत्सर्वमनुभुङ्क्ष्वाखिलेश्वर ॥

सर्वैं रूपैरवयवैर्गुणाकारक्रियादिभिः ।
भुङ्क्ष्व यावद्ब्राह्मणस्ते तर्पकं स्यादिदं सदा ॥

पूर्णस्य भोक्तृता नित्यतुष्टस्याप्यद्य तुष्टता ।
भुक्तैश्चाश्चर्यरूपस्य ह्यचिन्त्यैश्वर्यवारिधेः ।
अन्यादृशाभवद्भुक्तिरचिन्त्या दैवतैरपि ॥

Colophon :

इति सारभोगप्रकारः ॥

Subject. Sārabhogaprakāra.

Remarks :—The Ms is in good condition. This is a work attributed to Ānandatīrtha.

॥ अभिनवगदा ॥

8084. ABHINAVAGADĀ.

Burnell's Catalogue No. 6130. Page 108. Right column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—99. Lines—12 to a Page Script—Devanāgarī No. of Granthas—4750. Author—Satyanāthayati. Complete Not printed.

Beginning :

श्रीरामव्यासाय नमः ॥

नमामि ब्रह्म मोक्षार्थं जिज्ञास्यं विश्वकारणम् ।
अन्वयैः शास्त्रसंवेद्यमीक्षतेर्वाच्यमेव तत् ॥

जगद्गुरुं सत्यनिधिं सर्वशास्त्रविशारदम् ।
प्रणमामि सदा भक्त्या दुर्वादिजयकांक्षया ॥ २ ॥

सदाऽपेये(प्पय्य) दीक्षितस्य मृधे दुरभिमानिनः ।
पातयामि शिरस्यद्य गुर्वीमभिनवां गदाम् ॥ २ ॥

स्वकरिष्यमाणपञ्चाधिकरणीदूषणस्यारंभप्रथमश्लोकेनानाक्षिपति ।

शिवं विष्णुं वा यद्यभिदधति शास्त्रस्य विषयं
तदिष्टं ग्राह्यं नः सगुणमपि तद्ब्रह्म भजताम् ।
विरोधो नातीव स्फुरति न हि निन्द्यानयविदां
न सूत्राणामर्थान्तरमभिभवद्धार्यमुचितम् ॥

स्वपद्यं स्वयमेव व्याचष्टे ॥

End:

न हि परकीयं वस्तु आत्मीयत्वेन मन्यमानेन चोर इति संभवति। प्रसिद्धचोरस्यापि चोरत्वाभावापातात्। तस्मात् चोरेण त्वया महापुरुषाणां यच्चोरत्वमुक्तं तत् सुरापानजन्यविवेकाभावप्रयुक्त इति ज्ञेयम्। तवैतद्द्रोहप्रयुक्तदण्डं तमसि निपात्य श्रहौव करिष्यति।

अनामिको देवनामवर्जनाद्याहतं ब्रुवन्।
दृढं गदाप्रहारेणाधस्तमसि पातितः॥

Colophon:

इति श्रीमत्सत्यनिधितीर्थश्रीचरणचरणाराधकश्रीमत्सत्यनाथतीर्थयतिविरचितया अभिनवगदया षष्ठं युद्धं समाप्तम्॥

श्रीरामवेदव्यासार्पणमस्तु॥

अप्पयश्च प्रपातितः तमसि॥

Subject. Abhinavagadā 1-6 Yuddhas

Remarks:- The Ms is in good condition. He is the author of many works on Madhva Philosophy. For remarks see under No 7812.

॥ अभिनवगदा ॥

8085. ABHINAVAGADĀ.

Burnell's Catalogue No. 6031. Page 108. Right column. Substance—Paper. Size—1, ½ × 5 inches. Sheets—131. Lines—10 to a Page. Script—Devanāgarī. No. of Gran-

thas—4700. Author—Satyanāthayati Complete. Not printed.

Beginning, end colophon and subject—Same as No 8084.

Remarks:—The Ms. is in a decaying condition.

॥ उपसंहारविजयः ॥

8086. UPASAMHĀRAVIJAYAḤ.

Burnell's Catalogue No. 2912 Page 95. Left column. Substance—Palm leaf. Size—$16\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—96. Lines—4 to a Page. Script—Telugu. No of Granthas—1300. Author—Surendraśiṣya. Complete. Not Printed

Beginning :

रक्षोनाथस्य वक्षोभुवि विपुलनखैः वज्रकल्पैः कृतायां
रक्तस्रोतस्सरस्यां प्रतिफलितमिदं स्वं वपुर्वीक्षमाणः ।
स्वस्यांशं भार्गवाख्यं रघुवरमभिधं रावणं तत्प्रसक्त्या
चैद्यंरुष्टः प्रहृष्टः प्रविशतु हृदि शं तीव्रसिंहोऽनिशं नः ॥

सर्वदोषातिदूराय कल्याणगुणशालिने ।
श्रीमत्....प श्रीनृसिंहाय ते नमः ॥

उर्व्यां सक्रमतां याति यद्गुणाकर्णनेतरः ।
अर्णवं गुणरत्नानां पूर्णबोधं समाश्रये ॥

* * *

मूकोऽपि वावदूकेन्द्रो जायते यदनुग्रहात् ।
श्रीसुरेन्द्रगुरोस्तस्य पादौ स्मृत्वा भवेत्सुखम् ॥

ये नित्यं परिवार्यमाणसरणीसंशीलनालंकृता-
स्तेषामेव करोति या प्रतिपदं सन्तोषमाकर्णनात् ।
ये चानेकविनेयषट्पदततेः संफुल्लमल्लीसदा
नैषा दिग्विजयां प्रमाक्षमिमणेः(?) ज्ञानार्थिभिः सेव्यताम् ॥

गुरुपादोक्तिभिर्न्यायैः उपक्रमपराक्रमम् ।
निराकृत्योपसंहारविजयोऽयं प्रकाश्यते ॥

उपक्रमोपसंहारयोः यत्र भाति विरुद्धता तत्र पूर्वमीमांसिकैः पूर्वतन्त्रे.........।

End:

किं चास्त्यनन्यथासिद्धत्वं तस्या तथाप्युपक्रमोपसंहारान्यतरप्राबल्यानुपयुक्तत्वेन प्रकृतेऽनन्यथासिद्धत्वेन लिंगप्राबल्ये हेतुत्वस्यानुपन्यसनीयत्वात् । किं च उपसंहारस्थत्वेनैव लब्धप्राबल्यस्य संकोचितसर्वहितकारणत्वाद्यन्यतमब्रह्म इति सिद्धम् ॥

Colophon.

इत्युपसंहारविजयः समाप्तः वेदव्यासाय नमः ।

Subject Upasamhāravijaya, an elaborate treatise by a scholar of Dvaita school refuting the tenets of Appayadīkṣita set up in Upakramaparākrama.

Remarks:—The Ms is in a fairly good condition. This work is a criticism of Appayyadīkṣita's Upakrama Parākrama, and establishes the authority of the end. This author calls himself the disciple of Surendra who lived in the 16th century and was honoured by Rāmarāya of Vijyanagar. So this author must have flourished in the latter part of that century.

॥ तत्त्वरत्नप्रकाशिका ॥

8087. TATTVARATNAPRAKĀŚIKĀ.

Burnell's Catalogue No. 6102 Page 110. Left Column
Substance—Paper Size—10½ × 4 inches Sheets—41
Lines—11 to a Page. Script—Devanāgarī. No. of
Granthas—1550 Author—? Incomplete Not Printed.

Beginning:

श्री लक्ष्मीनृसिंहाय नमः ॥ हरिः ॐ ॥

जयतीर्थपूज्यचरणैस्तु सुधादिषु सर्वत्रासत्प्रतियोगिको ऽत्यन्ताभाव इति बहुशो निरूपितम् तद्द्वयस्याप्यर्थतयै- कत्वादविरोध इत्याहुः ॥

तथा हि शशविषाणादिरत्यन्ताभावस्य प्रतियोगी भ- वन्नारोपितसत्त्ववैशिष्ट्येनैव भाति । शशविषाणं नाशश- विषाणस्याभाव इति खल्वत्यन्ताभावानुभवो जायते । तत्र शशविषाणं नास्तीत्यस्य शशविषाणमस्तित्वोपेतं न भवतीति तस्य सत्त्वाभाव एवार्थ इति प्रतीयते ।

End:

ननु कालाकाशाद्यभिमानिनां ब्रह्मादीनामभिमन्य- मानयावद्वस्तुव्याप्त्ययोगात्कथं तदभिमान इति चेत् उच्यते । देशैकदेशगता एव सर्वमपरोक्षेण पश्यंस्तत्तद- भिमतिं कुर्वन्ति । यथा यज्ञदत्तादिः स्वगृहमानी परं तु साकल्येन गृहं न पश्यति सः न नियामको नापि गृहसत्त तदधी............... ॥

Colophon: Nil.

Subject : Tattvaratnaprakāśikā. A treatise on Mādhva Philosophy with profuse quotations from Nyāyasudhā of Jayatīrtha and other works.

Remarks :—There is no work written by Jayatīrtha by name Tattvaratna and so it cannot be a commentary of such a work. This author does not disclose his name. Further there are quotations from Madhvavijaya.

॥ तत्वसङ्ग्रहः ॥

8088. TATTVASAṄGRAHAḤ.

Burnell's Catalogue No. 6101 Page 109. Left column.

Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{7}{8}$ inches Sheets—47. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—874. Author—Śrīnivāsa. Complete. Not printed.

Beginning :

श्री गुरुभ्यो नमः ॥

लक्ष्मीपतिं हयग्रीवं ॰ कृष्णादिकान्नुमः ॥

समस्तगुरुभ्यो नमः ।

प्रायेणाल्पायुषो मर्त्याः कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युदाहृताः ॥

भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः ।
सन्ति तस्मात्संग्रहेण क्रियते ध्यानसंग्रहः ॥

सृष्टिरक्षाहृतिज्ञानेत्यारभ्य तदावेशास्तथा ज्ञात्वा मुक्तिर्भवति नान्यथेत्यन्तेन श्रीमन्० निर्णये सर्वज्ञाचार्यैरेव सृष्टिकर्तृत्वज्ञानस्य मोक्षसाधनत्वेन निर्णीतत्वात्

End:

भगवज्ज्ञानभोगाभ्यां निवृत्तसमस्तानिष्टकर्मणः स्वोत्त-मोपदेशेन ब्रह्मनाड्योत्क्रमणेन वा परित्यक्तदेहाः स्वोचि-तेन अर्चिरादिना वा पथा वैकुण्ठलोकवासिनं भगवन्तं हिरण्यगर्भेण सह प्राप्तभिन्नलिंगशरीराः विध्वंसप्रभृतयो ऽत्यन्तनिवृत्तानिष्टाः सम्यगाविर्भूतानन्तादिगुणाः भगव-त्समीप एव तमुपासीनाः न कदाचित्पुनरावर्तेत इत्येतन्मो-क्षस्वरूपम् ।

Colophon:

श्रीनिवासाख्यविदुषा रचितस्तत्त्वसंग्रहः ।
मध्वादिसद्गुरूणाञ्च प्रीत्यै भवतु सर्वदा ॥

इति श्रीतत्त्वसारसंग्रहः समाप्तः ॥

Subject. Tattvasārasangraha.

Remarks.—The Ms. is in good condition.

This work is one which deals with the establishment of Viṣṇu as the supreme lord incidentally criticising the Advaita theories. The work seems to have been called also Tattva-sārasaṅgraha. It is not printed. There is another author of this name who wrote many works on Dvaita philosophy chief of which being a commentary called Prakāśa on Vyāsa-tīrtha's Nyāyāmṛta. It is doubted if both are identical because while this author calls himself the disciple of Satyā-bhinava Tīrtha the other author calls himself as the disciple of Yādavendra. This author's Guru Satyābhinava Tīrtha or Satyābhinava Yati is the author of a commentary on Ānanda Tīrtha's Mahābhāratatātparyanirṇaya.

॥ तत्त्वसङ्ग्रहः ॥

8089. TATTVASAṄGRAHAḤ.

Burnell's Catalogue No 6100. Page 109 Left column. Substance—Paper. Size—6 × 2½ inches. Sheets—60. Lines—6 to a Page Script—Devanāgarī. No. of Granthas—526. Author—Śrīnivāsa. Incomplete, wants end. Not printed.

Beginning.

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥ ॐ ॥

लक्ष्मीपतिं हयग्रीवं नरसिंहं गुणार्णवम् ।
वेङ्कटेशं जगद्वन्द्यं व्यासकृष्णादिकान्नुमः ॥ १ ॥

आनन्दतीर्थं गुरुराजमीडे
श्रीमज्जयार्यं यतिराजमीडे ।
तद्वंशजातं परहंसराजं
श्रीसत्यनाथेन्द्रमहं नमामि ॥ २ ॥

यः सत्यनाथेन्द्रपदाम्बुजस्य
संसेवयावाप्तसमस्तभाग्यः ।
तत्संस्मृतिध्यानपरायणं तं
नतोऽस्मि सत्याभिनवीनतीर्थम् ॥ ३ ॥

प्रायेणाल्पायुषो मर्त्याः
कलावस्मिन् युगे जनाः ।

मन्दाः सुमन्दमतयो

मन्दभाग्या ह्युपद्रुताः ॥ ४ ॥

Same as No. 8088.

End:

योजनानां पञ्चविंशद्द्विशत्कोट्यो मेरुपर्वतात् ।

चतसृष्वपि दिक्षूर्ध्वमधश्चाण्डं प्रकीर्तितम् ॥ ३ ॥

ब्रह्माण्डान्तर्गतभूम्यपेक्षया ब्रह्माण्डखर्परं द्विगुणं शत-

कोटियोजनदलम् ॥

Subject : Tattvasangraha.

Remarks:—The Ms. is in good condition. It wants end.

॥ तर्कताण्डवम् ॥

8090. TARKATĀṆḌAVAM.

Burnell's Catalogue No. 6062. Page 108. Left column. Substance—Paper. Size—10 × 4½ inches. Sheets—6. Lines—13 to a page. Script—Devanāgarī. No. of Granthas—150. Author—Vyāsatīrtha. Incomplete. Beginning only. Printed

Beginning:

श्रीमन्मध्वगुरवे नमः ॥

अनन्तकल्याणगुणैकराशिमशेषदोषोज्झितमप्रमेयम् ।

मुमुक्षुभिः सेव्यमनन्तसौख्यप्रदं रमेशं प्रणमामि नित्यम् ॥

श्रीब्रह्मपादाम्बुजासक्तः करुणापूरशीतलः ।

मध्वाख्यमरुदंशो मे सन्तापान् हन्तु सन्ततम् ॥ २ ॥

आनन्दतीर्थोपदिष्टो निधिर्नारायणाह्वयः ।
प्रदर्शितो येन सम्यक् जयतीर्थं तमाश्रये ॥ ३ ॥

श्रीमदानन्दतीर्थस्वामिनः कमलापतेः ।
प्रीतये क्रियते व्यासयतिना तर्कताण्डवम् ॥ ४ ॥

End:

किञ्च इदानीन्तनब्राह्मणस्याब्राह्मणपूर्वकत्वेऽपि सर्गादिकालीनस्य तस्याऽदृष्टविशेषोपहिते भूतपूर्वकत्ववदिदानींतनद्विजत्वादेरपेक्षा बुद्धिजन्यत्वेऽप्यादिकालीनस्य दृष्टविशेषोपहितपरमाणुमात्रज्ञ...... ।

Subject. Tarkatāṇḍava.

Remarks:—The Ms. is in good condition.

This is an important work of the Mādhva school logically establishing dualism. This work is printed along with a commentary by Raghavendra Tirtha both at Kumbakonam and Bombay. For further remarks about the author see under No. 7988.

॥ तर्कताण्डवम् ॥

8091. TARKATĀṆḌAVAM.

Burnell's Catalogue No. 9759. Page 108 Left column.

Substance—Palm leaf Size—16 × 1¼ inches. Leaves—223. Lines—8 to a Page. Script—Telugu. No. of Granthas—8920. Author—Vyāsatīrtha. Incomplete. Printed.

Beginning—Same as No. 8090.

End:

मधुरतरमधुरतममित्यादौ तरबादेरुपसर्जनमाधुर्यगत-
स्वार्थाभिधायित्वदर्शनादिति वाच्यम् । समा...द्वन्द्वमि-
त्येव......माकारात्......धवखदिरौछिन्धीत्यत्र धातू-
पनतफलानुकूलसजातीयविजातीयव्यापार....... मात्रधी-
रिति न तत्र लक्षणेति ॥

Subject: Tarkatāṇḍava.

Remarks—The Ms is in a fairly good condition. This Ms. abruptly breaks off towards the close.

There is a loose leaf placed after the end beginning with ...लेधूमादावपि...।

A Subhāṣita also in Marathi is given:—

जोण्हालीकवली + घेवोसिवो

॥ तर्कताण्डवम् ॥

8092. TARKATĀṆḌAVAM.

Burnell's Catalogue No. 9760. Page 108. Left column. Substance—Palm leaf Size—16 × 1 Leaves—148. Lines —10 to a Page. Script—Grantha. No. of Granthas—1950. Author—Vyāsatīrtha. Complete. Not printed.

Beginning—Same as No. 8090.

End:

शब्देनैव मात्रधीरिति न तत्रापि लक्षणेति । द्वन्द्वसा-

हित्यलक्षणाभङ्गः । द्वारमित्यादौ तु पिधेहि पदस्यैवाध्या-
हारो न स्वर्थस्य न वा द्वारपदस्यैव पिधाने लक्षणा ॥
प्राभाकरास्तु + यत्तूक्तं मणौ क्रियाकारके हि क्रिया-
कारक.. ... ।

Subject: Tarkatāṇḍava.

Remarks:—The Ms is in a fairly good condition, This Ms. abruptly breaks off towards the close of the work.

॥ तर्कताण्डवम् ॥

8093. TARKATĀṆḌAVAM.

Burnell's Catalogue No. 6061, Page 108. Left column. Substance—Paper. Size—10×4¼ inches. Sheets—55 (2-56). Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—1480. Author—Vyāsatīrthā. Incomplete. Printed.

Beginning:

बन्धे सति साक्षिणा प्रामाण्यस्याग्रहणात् बाध इति
शङ्का च निरस्ता । अत्र यद्यपि विषयत्वं साक्षिज्ञानं प्र-
त्येवेति नियमो न युक्तं मन्मतेऽपि प्रामाण्यस्यानुमित्यपि
ग्राह्यत्वात् ।

End:

विशेष्यनिष्ठैव व्याप्तिर्विशेषणेनावच्छिद्यत इति वा ।

तत्र व्यासज्य वृत्तित्वे केवलविशेष्यवृत्तित्वासंभवो हेतुः ॥

Subject: Tarkatāṇḍavam.

Remarks:—The Ms. is in good condition.

॥ तर्कताण्डवम् ॥

8094. TARKATĀṆḌAVAM.

Burnell's Catalogue No. 6060 Page 108. Left column. Substance—Paper. Size—9⅞ × 8½ inches. Sheets—27 (42-68) Lines—11 or 12 to a Page. Script—Devanāgarī No. of Granthas—800. Author—Vyāsatīrtha. Incomplete. Printed.

Beginning:

...त्वादिकं वा। अथवा तद्विपर्ययेण द्वाराजन्यत्वे(?) जन्यकर्तृजन्यत्वे तु घटत्वादिकं वेति संदेहेन संदिग्धोपाधेर्दुष्परिहरत्वात्।

End:

अत एव स्वरूपयोग्यताव इयं भिन्ना। सा हि जनितफलेऽप्यस्ति। इयं तु फलजननात्प्रागेव। न चाभावे तारतम्याभावेनाकांक्षा।

Subject: Tarkatāṇḍava.

Remarks:—The Ms. is in good condition.

॥ तर्कताण्डवव्याख्या—न्यायदीपः ॥

8095. TARKATĀṆḌAVAVYĀKHYĀ—NYĀYADĪPAḤ.

Burnell's Catalogue No. 6063. Page 108. Left column.
Substance—Paper. Size—11⅜ × 4¼ inches. Sheets—100. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—3150 Author—Rāghavendra. Incomplete. First Pariccheda. Printed.

Beginning:

श्रीगुरुभ्यो नमः ॥ श्री वेदव्यासाय नमः ॥
श्रीगोपालकृष्णाय नमः ॥ श्रीलक्ष्मीनृसिंहाय नमः ॥

विश्वोत्पत्तिस्थितिध्वंसकारणं रमणं श्रियः ।
प्रणम्य पूर्णबोधादीन् व्याकुर्वे तर्कताण्डवम् ॥ १ ॥

गुरुपादकृताप्यस्ति व्याख्या सात्यन्तविस्तरा ।
व्याख्येयं मन्दबोधाय क्रियते शेषगोचरा ॥ २ ॥

ग्रन्थादौ विशिष्टेष्टदेवतानतिरूपमंगलमाचरति ॥ अनन्तेति ॥

End:

बाधकस्य चेहाग्रेपि र...क्ष्यमाणत्वादस्याप्युत्सर्गविषयत्वमेवेति भावः । न चैवमपि तूलपिण्डादिपरिमाणस्य परिशीलं भूयो ?........ ।

Subject: Tarkatāṇḍavavyākhyā, otherwise known as Nyāyadīpa. I Pariccheda.

Remarks:—The Ms. is in good condition. This Ms. abruptly breaks off in the middle of the I Pariccheda. This commentary along with the text of Vyāsatīrtha is printed both at Kumbakonam and Bombay in 1914. For details about the author see remarks under No. 5758.

॥ तर्कताण्डवव्याख्या—न्यायदीपः ॥

8096. TARKATĀṆḌAVAVYĀKHYĀ-NYĀYADĪPAḤ.

Burnell's Catalogue No 6004. Page 108. Left column. Substance—Paper. Size—$9\frac{3}{8} \times 3\frac{3}{8}$ inches. Sheets—213. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—4800 Author—Rāghavendra Incomplete. I Pariccheda only. Printed.

Beginning—Same as No 8095.

End·

प्रसक्तानुप्रसक्तप्रमेयोपपादनस्यादिवर्जितैरित्युक्तविशेषणसमर्थनं न फलमिति दर्शयन्परिच्छेदार्थमुपसंहरति तदेवमिति। उक्तेति। समवायरूपप्रत्यासत्तिर्नेत्युक्तरीत्येत्यर्थः। युक्तामिति। तथाऽप्याम्नायैरादिवर्जितैरित्युक्तं साध्विति भावः ॥ निर्विकल्पकवादः ॥

Colophon

इति श्रीमत्सुधीन्द्रतीर्थपूज्यपादशिष्यराघवेन्द्रयतिकृते तर्कताण्डव-विवरणे न्यायदीपे प्रथमः परिच्छेदः ॥

हरिः ॐ ॥ श्रीगुरुभ्यो नमः ॥ श्रीकृष्णाय नमः ॥

Subject : Tarkatāṇḍavavyākhyā—otherwise known as Nyāyadīpa. I Pariccheda.

Remarks :—The Ms. is in good condition. This Ms. abruptly breaks off twards the close of the I Pariccheda.

॥ तर्कताण्डवव्याख्या—न्यायदीपः ॥

8097. TARKATĀṆḌAVAVYĀKHYĀ—NYĀYADĪPAḤ.

Burnell's Catalogue. No. 6065. Page 108. Left column. Substance—Paper. Size—$9\frac{1}{8} \times 3\frac{7}{8}$ inches. Sheets—285 (3-284) Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—6860. Author—Rāghavendra. Incomplete II Pariccheda only. Printed.

Beginning ;

....मित्यादिपदेन वाक्याकांक्षासंनिध्यादेर्ग्रहः । अत एवेति पदादिस्वरूपव्युत्पादनार्थं एवेति वार्थः मूलेति निर्दोषः ॥ ॐशब्द आगम इति मूलस्थमित्यर्थः ॥

End.

परोक्तखण्डनस्योपयोगं वदन्नुपसंहरति । तस्मादिति ।

उक्तदिशा परोक्तस्य दोषग्रस्तत्वात् टीकोक्तस्य चानवद्यत्वादित्यर्थः ॥ प्रभाकरोक्तश्रुत्यादि बलाबलबीजभंगः ॥

Colophon:

इति श्रीमत्सुधीन्द्रगुरुपादशिष्यराघवेन्द्रयतिकृते तर्कताण्डवविवरणे न्यायदीपे द्वितीयपरिच्छेदः समाप्तः ॥

॥ श्रीः ॥ श्री कृष्णार्पणमस्तु ॥ वेंकटकृष्णान् सेवे

Subject: Tarkatāṇḍavavivaraṇa, otherwise known as Nyāyadīpa II Pariccheda.

Remarks:— The Ms. is in good condition.

॥ अभिनवतर्कताण्डवम् ॥

8098. ABHINAVATARKATĀṆḌAVAM.

Burnell's Catalogue No. 6055. Page 108 Right column. Substance—Paper. Size—10⅝ × 4½ inches. Sheets—440. (103+179+158). Lines—10 or 11 to a Page Script—Devanāgarī. No of Granthas—11367 Author—Satyanāthayati. Complete. Not Printed.

Beginning:

श्रीमद्गुरुरामचन्द्राय नमः । श्रीमन्नृसिंहाय नमः ॥

हरिः ॐ ॥

यदीयचरणस्पर्शाच्छिलाभूज्ज्ञानिसत्तमा ।
अहल्याज्ञानसिद्ध्यर्थं रामचन्द्रं तमाश्रये ॥ १ ॥

ज्ञानं यः स्थापयामास देवमानवपक्षिषु ।
ज्ञानविज्ञानसिद्ध्यर्थं वेदव्यासमहं भजे ॥ २ ॥

अनुव्याख्यामृताम्भोधिर्यदास्यान्निःसृतोऽमरान् ।
नरान् करोति तं वन्दे पूर्णबोधं जगद्गुरुम् ॥ ३ ॥

सुधा यदीया विबुधान्तोषयत्यमरानिव ।
नमामि विबुधैर्वन्द्यं जयतीर्थं सुधाकरम् ॥ ४ ॥

व्यासराजमहं वन्दे यदीयं तर्कताण्डवम् ।
मूकोऽप्यधीत्य वाग्मीशो भवेदज्ञोऽपि बुद्धिमान् ॥ ५ ॥

वादिनो नरशब्देन जगुः संसदि वादिना ।
बुधा येन पराभूतास्तं सत्यनिधिमाश्रये ॥ ६ ॥

नरेषु हरिरेवायमिति यं विबुधा जगुः ।
वादिनिर्जयकौशल्यं दृष्ट्वाचार्यं तमाश्रये ॥ ७ ॥

सुधापानाद्भयातीतः तर्काशीविषमूर्धनि ।
करोति केकिवत्सत्यनाथोऽभिनवताण्डवम् ॥ ८ ॥

नमामि जानकीजानिं विशिष्टग्रन्थसिद्धये ।
वन्दनं मंगलं यस्य शिष्टाः कुर्वन्ति सन्ततम् ॥ ९ ॥

ननु अयुक्तं प्रारीप्सितनिष्पत्त्यर्थं मंगलानुष्ठानम् ।

End:

यदपि कथं तर्हि चेष्टातो व्यवहार इत्याशङ्क्य संशय-
प्रतिभयोरन्यतरस्मादिति समाधानमुक्तम् । तदपि

न। चेष्टातो निष्कम्पप्रवृत्तिदर्शनेन संशयप्रतिभयोरन्यतर-
स्मादित्यवधारणाऽयोगात्। चेष्टातोऽनुमिनोमीति व्यव-
हारदर्शनाच्च। यदपि चत्वारि प्रमाणानीति तदप्ययुक्तम्।
अर्थापत्त्यादीनामिवोपमानस्यापि पृथक्प्रामाण्याभावात्।
उपमानस्यानुमानान्तर्भावस्तु प्रागेव दर्शितः।

Colophon:

इति श्रीमत्सत्यनिधितीर्थश्रीचरणचरणाराधकश्रीमत्सत्यनाथयतिविर-
चितेऽभिनवताण्डवे शब्दखण्डः समाप्तः ॥

Subject: Abhinavatarkatāṇḍava.

Remarks:—The Ms. is in good condition.

This is a very elaborate treatise logically establishing dualism on the lines of Tarkatāṇḍava of Vyāsa Tīrtha For remarks see under No. 7842.

॥ अभिनवतर्कताण्डवम् ॥

8099. ABHINAVATARKATĀṆḌAVAM.

Burnell's Catalogue No. 6056. Page 108. Right column. Substance—Paper. Size—$10\frac{3}{8} \times 4\frac{1}{2}$ inches. Sheets—117. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2562. Author—Satyanāthayati. Incomplete. Pratyakṣa only. Not Printed.

Beginning—Same as No. 8098.

End:

....पाकरक्तभ्रान्तिगृहीतस्यैतत्कालावच्छिन्नश्यामत्वस्य

श्यामतादशायामप्यसत्त्वेन याथार्थ्यापादनस्य विभ्रममूल-
कत्वात् । इत्यशेषमतिमंगलम् । मत्सर्वसज्जनस्मरणसरणि-
गोचरचरणनलिनयुगलगुर्वन्तर्गतश्रीरामचन्द्रार्पणमस्तु ॥
इति मण्युक्तस्मृत्ययाथार्थभङ्गः ॥

Colophon:

इति श्रीमत्सत्यनिधितीर्थ श्रीचरणाराधक श्रीमत्सत्यनाथय-
तिविरचिते अभिनवताण्डवे प्रत्यक्षखण्डः समाप्तः ॥
श्रीरामचन्द्राय नमः ।

Subject: Abhinavatarkatāṇḍava Pratyakṣakhaṇḍa.

Remarks:—The Ms. is in good condition.

॥ अभिनवतर्कताण्डवम् ॥

8100. ABHINAVATARKATĀṆḌAVAM.

Burnell's Catalogue No. 6057. Page 108. Right column. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—142. Lines—11 to a Page. Script—Devanāgarī. No. of Granthat—3925. Author—Satyanāthayati. Incomplete. Śabdakhaṇḍa only. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥

नमामि नारायणमादिदेवं
लक्ष्मीपतिं सर्वगुणैरुदारम् ।

शब्दैकगम्यं समतीतदोषं

श्रीमध्वहृत्पद्मगतं मुदेऽहम् ॥ १ ॥

शिक्षयन्निव दुस्तर्कसर्पमूर्धनि नर्तनम् ।
यश्चकार श्रये कृष्णं कालियांघ्रिषु नर्तनम् ॥ २ ॥

न क्षमा यस्य पुरतः वक्तुं सदसि वादिनः ।
अभ्यस्ताखिलविद्याढ्यः श्रये सत्यनिधिं गुरुम् ॥ ३ ॥

अथशब्दो निरूप्यते ॥

End

यदपि चत्वारि प्रमाणानीति । तदप्ययुक्तम् । अर्थापत्त्यादीनामिवोपमानस्यापि पृथक् प्रामाण्याभावात् । उपमानस्यानुमानान्तर्भावस्तु प्रागेव दर्शितः ॥

Colophon:

इति श्रीसत्यनिधितीर्थश्रीचरणाराधकश्रीमत्सत्यनाथयतिविरचितेऽभिनवताण्डवे शब्दखण्डः समाप्तः ॥

श्रीरामवेदव्यासार्पणमस्तु ॥ श्रीगुरुरामार्पणमस्तु ॥

Subject: Abhinavatarkatāṇḍava Sabdakhaṇḍa only.

Remarks:—The Ms. is in good condition. This Ms. begins abruptly with the Sabdakhaṇḍa and ends at the close of the same Khaṇḍa.

॥ अभिनवतर्कताण्डवम् ॥

8101. ABHINAVATARKATĀṆḌAVAM.

Burnell's Catalogue No. 6058. Page 109. Right column.

Substance—Paper. Size—$13\frac{1}{2} \times 5\frac{1}{8}$ inches. Sheets—297. Lines—11 to a Page. Script—Grantha. No. of Granthas—11367. Author—Satyanāthayati Complete. Not Printed.

Beginning, end, colophon and subject—Same as No. 8098.

Remarks:—The Ms. is in good condition.

॥ न्यायामृतम् ॥

8102. NYĀYĀMṚTAM.

Burnell's Catalogue No. 6047. Page 108. Left column. Substance—Paper. Size—$8\frac{3}{8} \times 2\frac{7}{8}$ inches. Sheets—69. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—Vyāsatīrtha. Complete. Printed.

Beginning:

श्री वेङ्कटेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

श्री सत्यविजयतीर्थगुरुभ्यो नमः ॥ शुभमस्तु ॥

निखिलगुणनिकायं नित्यनिर्धूतहेयं

शुभतममतिमेयं शुद्धसौख्याप्त्युपायम् ।

सकलनिगमगेयं सर्वशब्दाभिधेयं

नवजलधरकायं नौमि लक्ष्मीसहायम् ॥

ज्ञानवैराग्यभक्त्यादिकल्याणगुणशालिनः ।

लक्ष्मीनारायणमुनीन्वन्दे विद्यागुरून्मम ॥

श्रीपद्मनाभसद्दुग्धाब्धि श्रीमन्दरमहीभृता ।
आमथ्योद्ध्रियते न्यायामृतं विबुधतृप्तये ॥ ७ ॥

End :

प्रत्यक्षं प्रमाणत्वेन निश्चितं चेत्तद्बाधो मिथ्यात्वानुमानादेः । अनिश्चितश्चेत्प्रत्यक्षं मिथ्यात्वश्रुतिविषयापहार इव श्रुतिं विनोपहारोप्यशक्यं स्वप्रामाण्यनिर्णयाय श्रुतिसंवादापेक्षं सत्त्वश्रुत्यनुवादकत्वापादकम् । अग्न्यौष्ण्यप्रत्यक्षस्य प्रामाण्यनिश्चयेऽग्निर्हिमस्य भेषजम्...

Subject. Nyāyāmṛta. I Pariccheda

Remarks:—The Ms. is in good condition This Ms. abruptly breaks off at the end of the 1st Pariccheda. This work is printed along with a commentary by Srīnivāsa at Bombay being edited by T. R. Kṛṣṇācārya.

Vyāsayati wrote his Nyāyāmṛta as a critique on the Advaita Vedānta logically establishing Dvaita Vedānta. After him Madhusūdana Sarasvati in his Advaita Siddhi criticised the doctrines of Nyāyāmṛta and established Advaita. Again Dvaita found a protagonist in one Rāmācārya who in his commentary on Nyāyāmṛta called Taraṅgiṇī criticised Madhusūdana Sarasvati. On behalf of Advaita again the great Brahmānanda in his Gauḍabrahmānandīya refuted the theories of Taraṅgiṇī and logically established the Advaita theory. It is said that one Vanamālimiśra again criticised Brahmānanda in his Saurabha A succinct account of these happenings is given in the introductory verses of a Dvaita work called Nyāyaratnākara which is said to have been

written to give support to Saurabha and criticise Brahmānanda. Vyāsayati is the author of many works on Dvaita Philosophy.

This work has been commented upon by many. Śrīnivāsa's Prakāśa and Rāmācārya's Taraṅgiṇī are the most important and are printed.

॥ न्यायामृतम् ॥

8103. NYĀYĀMṚTAM.

Not noticed by Burnell Ms. No 6048.

Substance—Paper. Size—10 × 4½ inches. Sheets—90. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1900 Author—Vyāsatīrtha Incomplete, Printed.

Beginning.

— न वृश्चिकादिनोपादानस्वभावविभवः । शिष्टमत्र-शिष्टमविद्यानिवर्तकभंगे वक्ष्यते । न चामूलज्ञानस्यैवाव-स्थाविशेषरजताद्युपादानानि श्रुतिज्ञानेन साध्यानि संनि-वर्तन्त इति वाच्यम् ॥

End.

न चापितृतोपस्थापितदेवदत्तसंस्थानविशेषतया ज्ञात एवेदंताधीः । तत्रेदंतादि संबन्धस्य प्रत्यक्षत्वेन अनु-पदिश्यत्वात् । तस्मादतो....

Subject: Nyāyāmṛta—a treatise on the theology of Mādhva school of Vaiṣṇavas. I and II Paricchedas.

Remarks:—The Ms. is in good condition.

॥ न्यायामृतम् ॥

8104. NYĀYĀMṚTAM.

Burnell's Catalogue No. 6049. Page 108 Left column. Substance—Paper Size—8⅝ × 2⅞ inches. Sheets—45. Lines—8 to a Page. Script—Devanāgarī. No of Granthas—800. Author—Vyāsatīrtha Incomplete. Printed.

Beginning.

श्री वेङ्कटेशाय नमः ॥

श्रीसत्यविजयगुरुभ्यो नमः ॥

नन्वेतदयुक्तम् । द्विविधं हि वेदान्तवाक्यम् । एकं पदार्थनिष्ठम् । यथा सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि तत्पदार्थपरम् ॥

End·

एतेन सावयववादिना भगवल्लोकादेरनित्यत्वसाधनमप्यपास्तम् ।

अतो हि वैष्णवा लोका नित्यास्ते चेतनात्मकाः ।
मत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यति शाश्वतम् ॥

इत्याद्यागमविरोधात् । तस्मात् सगुणं साकारश्चेति । ब्रह्मणो निराकारत्वभंगः ।

Subject: Nyāyāmṛta. II Pariccheda

Remarks:—The Ms is in good condition

॥ न्यायामृतव्याख्या—तरङ्गिणी ॥

8105. NYĀYĀMṚTAVYĀKHYĀ—TARAṄGIṆĪ.

Burnell's Catalogue No. 6052. Page 108. Left column, Substance—Paper. Size—11½ × 4½ inches. Sheets—631. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—13860. Author—Rāmācārya. Complete. Printed.

Beginning

श्री कृष्णाय नमः ॥

श्रियं सदानन्दगुणैर्भृतं भुजे
भुजेप्यदोषं तदशेषशक्तिभिः ।
विशेषवाणीमितमात्मनो मुदे
मुदा रमेशं प्रियवल्लभं नुमः ॥

* *

भङ्गान् संप्रतिबिम्बमम्बुजदशापत्रीविचित्रीकृतम् ।
स्वस्यन्दोत्थतरंगिणीद्विजमुखैर्न्यायामृतं व्याकृतं
................श्रवन(न्तु)लेखा इव ॥ ७ ॥

End:

तेभ्यो जायत विश्वनाथ इति यः सज्ज्ञानरत्नाकर-
स्तस्मादाविरभूत्सुरद्रुमयशा आचार्यनारायणः ।
रामाचार्य इतीरितस्तदनुजो यस्तत्त्ववादाम्बुधे-
रातानीत्सतरङ्गिणीमिह परिच्छेदश्चतुर्थोऽपि यः ॥

Colophon:

.........विरचितन्यायामृततरंगिण्यां चतुर्थः परिच्छेदः समाप्तः ॥

ग्रन्थः ।

Subject: Nyāyāmṛtavyākhyā otherwise known as Taraṅgiṇī. 1-4 Paricchedas.

Remarks:—The Ms is in a good condition.

This is one of the most important works on Dvaita Vedānta and is written as a counterblast to the Advaita Siddhi of Madhusūdanasarasvati. This in its turn evoked the famous Gauḍa Brahmānandīya. This is printed both at Bombay and Kumbakonam in 1910 edited by T. R. Kṛṣṇācārya

---

॥ न्यायामृतव्याख्या—तरङ्गिणी ॥

8106. NYĀYĀMṚTAVYĀKHYĀ—TARAṄGIṆI.

Burnell's Catalogue No. 6053. Page 108. Left column. Substance—Paper. Size—9½ × 3½ inches. Sheets—42. Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Rāmācārya Incomplete. Printed.

Beginning—Same as No. 6052.

End:

तथा सति रूप्येऽपि सत्वासत्वोभयसमुच्चयापत्त्या तदुभयवैलक्षण्यस्यानङ्गीकरणीयत्वात् । ख्यातिबाधावपि सत्त्वासत्वाभ्यामुपपादनीयाविति भावः । एतेनैव वृक्षसंयोगतदत्यन्ताभावयोरिव प्रपञ्चमिथ्यात्वं च ।

Subject· Nyāyāmṛtavyākhyā otherwise known as Taraṅgiṇī I Pariccheda.

Remarks:—The Ms. is in good condition. This Ms abruptly breaks off at the middle of the I Pariccheda

---

॥ न्यायामृतव्याख्या— तरङ्गिणी ॥

8107. NYĀYĀMṚTAVYĀKHYĀ—TARAṄGIṆĪ.

Burnell's Catalogue No. 6054 Page 108. Left column. Substance—Paper. Size— $12\frac{1}{4} \times 3\frac{7}{8}$ inches. Sheets—52. Lines—8 to a Page. Script—Devanāgarī. No of Granthas—1500. Author—Rāmācārya. Incomplete. Printed

Beginning

नन्वेतदयुक्तम् । द्विविधं हि वेदान्तवाक्यम् । एकं पदार्थनिष्ठम् । यथा सत्यं ज्ञानमित्यादिपदम् ।

End

न हि शून्यानां संयोगात्कस्यचिज्जन्म । येनावयवानां विभागेन शून्यपरिशेषः स्यात् । अपि च विदारकमपि लवित्रादि स्वयं यत्संबन्धि तदवविदा…

Subject Nyāyāmṛtavyākhyā Taraṅgiṇī. II Pariccheda.

Remarks:—The Ms. is in good condition The Ms abruptly begins in the middle of the II Pariccheda and breaks off abruptly in the middle.

॥ न्यायामृतव्याख्या—आमोदः ॥

8108. NYĀYĀMṚTAVYĀKHYĀ—ĀMODAḤ.

Burnell's Catalogue No. 6051. Page 108. Left column.
Substance—Paper. Size—9½ × 4½ inches Sheets—152 (1, 2, 61 and 62 are wanting out of 156). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—2650. Author—VijayIndra Incomplete. Not printed.

Beginning

श्रीबादरायणाय नमः ॥

ॐ ॥ वेदान्तेति ॥ वस्तुनिष्ठवेदान्तेत्यर्थः । एकमिति । राश्यभिप्रायम् । पदार्थनिष्ठमिति । तत्त्वमस्यादिमहावाक्यगततत्त्वमादिपदपरमित्यर्थः । तत्पदार्थपरमिति ॥

End .

यदुक्तमावृत्तौ तत्त्वसाक्षात्कारादविद्यासंस्कारनिवृत्तिरिति तद्दूषयति । पूर्वसाक्षात्कारेति । तदनधिकविषयेष्वपूर्वसाक्षात्कारानधिकविषयेण निवृत्त्यदर्शनादिति । अन्यथेदं रजतमित्यादिभ्रमस्थले प्रमेयमिति ज्ञानेन…

Colophon: (Sheet No. 108)

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमत्सुरेन्द्रतीर्थपूज्यपादानां शिष्येण विजयीन्द्रभिक्षुणा विरचितायां आमोदाख्यायां न्यायामृतव्याख्यायां द्वितीयः परिच्छेदः ।

Subject: Nyāyāmṛtavyākhyā otherwise known as Āmoda. II Pariccheda only.

Remarks:—The Ms. is in good condition. This is a learned commentary on Vyāsayati's Nyāyāmṛta not yet published. For further remarks see under No. 7854

॥ न्यायामृतटीका—कण्टकोद्धरणम् ॥

8109. NYĀYĀMṚTAṬĪKĀ—KAṆṬAKODDHARAṆAM.

Burnell's Catalogu No. 6050. Page 108. Left column.

Substance—Pape Size—$8\frac{5}{8} \times 4\frac{3}{8}$ inches. Sheets—88. Lines—10 or 11 t a Page Script—Devanāgarī. No. of Granthas—2000. A thor—?. Incomplete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

नारसिंहं हयग्रीवं वेदव्यासं गुरूंस्तथा ।
नत्वा न्यायामृतव्याख्यां करिष्ये धीविशुद्धये ॥

अत्र ग्रन्थकृदभीष्टकर्मणो निर्विघ्नपरिसमाप्त्यर्थं कृतं परदेवतास्तुतिनतिरूपं मंगलं शिष्यशिक्षार्थं ग्रन्थे निबध्नाति । निखिलेति ॥ अत्र परिच्छेदचतुष्टयात्मके ग्रन्थे अथातो ब्रह्मजिज्ञासेत्यध्यायचतुष्टयात्मकशास्त्रप्रतिपाद्यानामनन्तगुणपूर्णत्वानिर्दोषत्वसाधनविषयत्वफलदातृत्वानां

